International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 133-136
© 2026 IJMH
www.themultijournal.com
Received: 18-07-2026
Accepted: 12-08-2026
Publish : 14-08-2026

**सुधामयी पति**
शोधच्छात्रा, धर्मशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**सुधामयी पति**
शोधच्छात्रा, धर्मशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# संस्कारतत्त्व-संस्कारसारदृष्ट्या प्राग्जन्मसंस्काराः

**सुधामयी पति**

[ **सारांशः** – *प्रस्तुत लेखेऽस्मिन् आदौ संस्कारतत्त्व– संस्कारसारदृष्ट्या संस्कारस्य स्वरूप भेदादिविषये कथयित्वा ततः प्राग्जन्मसंस्काराः गर्भाधानं पुंसवनं सीमन्तोन्नयनानां स्वरूप-काल-प्रयोगादिविषये स्मृति-सूत्र-पुराण-निबन्धादि वचनानि समुत्थाप्य विचारः स्यात्। तत्र संस्काराणां संख्याविषये मतभिन्नता परिलक्ष्यते। केषाञ्चित् मतानुसारेण षोडशसंस्काराः अपरेषां तु पञ्चविंशतिः, अन्ये केचन चत्वारिंशत् अष्टचत्वारिंशत् वा संस्काराणि प्रतिपादितानि। तथापि तत्तद् गृह्यसूत्रानुसारेण तथा तथा कर्माणि अनुष्ठेयानि इति संस्कारसारकारस्याशयः। ततः गर्भाधानसंस्कारस्य कालादिविषये प्रतिपादितानि। स्त्रीणां शोणितदर्शनोपलक्षितः गर्भग्रहणसमर्थः शरीरावरणविशेषो भवति ऋतुः। अतः ऋतु प्रजाजननयोग्यकालः तन्निमित्तेन नैमित्तिकं गमनं कार्यम्। स च ऋतुकालः रजोदर्शनमारभ्य षोडशनिशापरिमितकालः। तस्मिन् ऋतौ आद्या चतस्रः रात्रयः, चतुर्दशी-अष्टमी-आमावस्या-पूर्णिमादयः पर्वाणि, संक्रान्तिः, ज्येष्ठा-मूल-मघा-आश्लेषा-रेवती-कृत्तिका-अश्विनी-उत्तराषाढा-उत्तरभाद्रपद-उत्तरफाल्गुन्यादयः नक्षत्राणि वर्ज्यानि। एता रात्रयः वर्जयित्वा अन्यासु युग्मासु पुत्रार्थी अयुग्मासु कन्यार्थी स्त्रीसंगमनं कुर्यात्। ततः पुंसवनाख्य संस्कारविषये विचारः अस्ति। पुमान् सूयतेति पुंसवनम्। गर्भमासस्य तृतीये चतुर्थे मासि वा पुंसवनाख्य संस्कारः करणीयम्। संस्कारस्य शुभाशुभतिथिनक्षत्रादि प्रसंगेऽपि अत्र विचारः अस्ति। ततः सीमन्तोन्नयनाख्य संस्कारस्य तिथिनक्षत्रादिकालविषये विचारः अस्ति।* ]

मानवजीवनं संस्कारमयम्। निषेकादारभ्य श्मशान पर्यन्तं तस्य व्याप्तिः। तत्र संस्काराः द्विजानां समन्त्रकः करणीयः, शूद्राणां स्त्रीणां तु विवाहोऽतिरिच्य अन्यानि सर्वाणि संस्काराणि तूष्णीं करणीयानि। यथा प्राप्यते [1]संस्कारसारे योगीयाज्ञवल्क्य-वचनानुसारेण-

**ब्रह्मक्षत्रियविट्-शूद्रवर्णास्त्वाद्यास्त्रयो द्विजाः।**
**निषेकाद्या श्मशानान्तास्तेषां वै मन्त्रतः क्रिया।।**
**तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः।। इति।**

तथैव [2]ब्रह्मपुराणवचनानुसारेण तत्रैव-

**विवाहमात्रं संस्कारः शूद्रोऽपि लभते सदा।**
**मन्त्रस्तु अवैदिकत्वादेव तस्य निवृत्तः।**
**विवाहमात्रशब्दस्तु विहितेतरसंस्कारनिवृत्यर्थः। इति।**

तत्र ब्राह्मो दैव भेदेन संस्कारस्य द्वैविधत्वमाप्नोति संस्कारसारकारेण। एतयोः ब्राह्मसंस्कारस्तु गर्भाधानादि स्नानान्तः। तथैव दैवस्तु पाकयज्ञाः, हविर्यज्ञाः, सौम्याश्चेति। तत्र ब्राह्मसंस्कारैः संस्कृतजनः ऋषीणां समानतां सायुज्यं च प्राप्नोति। तदवत् दैव संस्कारैः संस्कृतजनः देवानां समानतां सायुज्यं च प्राप्नोति। यथा प्राप्यते [3]संस्कारसारे गौतमवचनानुसारेण- गर्भाधानं पुंसवनं अनवलोभन-सीमन्तोन्नयन-जातकर्म-नामकरण-निष्क्रमणान्नप्राशन-चौलोपनयनचत्वारि वेदव्रतानि तपः सहधर्म-चारिणी संयोगः पञ्चानां यज्ञानामनुष्ठानमष्टका पार्वणश्राद्धं श्रावण्याग्रायणी चैत्री आश्वियुजी चेति सप्तपाकसंस्थाः अग्न्याधेयमग्निहोत्रदर्शपूर्णमासाग्रायणाचातुर्मास्यानि निरुढपशुबन्धसौत्रामणिसप्तहविर्यज्ञ-संस्थाः। अग्नि-ष्टोमोऽत्यग्निष्टोमः उत्तमषोडशी बाजपेयोऽतिरात्रौ सोर्यायाम इति सप्तसंस्था इत्येते चत्वारिंशत्संस्काराः। अष्टावात्मगुणा सर्वभूतिक्षान्तिरनसूयाशौचमनायासो मङ्गलमकामास्पृहेति।

वेदव्रतानि प्रतिवेदमाम्नातानि प्राजापत्यादीनि। स्नानं समावर्तनं गुरुकुलवासावसानलक्षणम्। सहधर्मचारिणीसंयोगो विवाहः। देवयज्ञादयः पञ्चायज्ञाः। अष्टकाः श्राद्धविशेषः। पार्वणं पर्वणि क्रियामाणं स्थालीपाकलक्षणं श्राद्धम्। आग्रायणी आग्रायणेष्टिः वैत्रीदोलाकाख्यं कर्म। आश्वयुजी इन्द्रध्वजहोमाख्यं कर्म, अन्ये प्रसिद्धा इति नोक्ताः, केचिद् औपासनहोमो वैश्वदेव पार्वण-अष्टाकाश्राद्धादि मासिकश्राद्धं सर्पबलिः ईशानबलिरिति सप्तपाक-यज्ञानाहुः। आत्मगुणलक्षणं प्रागेव अभ्यधायि। यस्येते चत्वारिंश-त्संस्कारा अष्टौ आत्मगुणाः सः ब्राह्मणः सायुज्यमेति।

पुनश्च तत्र संस्काराणां संख्याविषये उभयत्र [4]हारीतवचनानुसारेण प्राप्यते यत्-गर्भाधानवदुपेतो ब्रह्मगर्भसन्दधाति। पुंसवनात् पुंसीक-रोति। फलस्तपनान्माता पितृजं पाप्मानमपोहति। रेतोरक्तग-र्भोपघातः पञ्चगुणो जातकर्मणा प्रथममपोहति। नामकरणेन द्वितीयं, प्राशनेन तृतीयं, चूडाकरणेन चतुर्थं, स्नानेन पञ्चमं एतैरष्टभिः संस्कारैः गर्भोपघातात् पूतो भवति। उपनयनाद्या-भिरष्टाभिर्व्रत-चर्याभिरन्तर्व्रतैश्चाष्टाभिः स्वछन्दसि निरूढो ब्राह्मणः परं पात्रं देपपितॄणां भवति। छन्दसां पारग इति।

अस्यार्थः गर्भाधानवद् गर्भाधानविधिना विष्णुर्योनि कल्पयत्वि-त्यादिना उपेतः स्त्रियमुपगतः। ब्रह्मगर्भं सन्दधातीति। ब्रह्म वेदः ब्रह्मलोकमित्यादिश्रुतेः। तद्ग्रहणयोग्यं गर्भं सन्दधाति सञ्जनयति। पुंसीकरोति अव्यक्तलिंगं गर्भं पुमांसं करोति। पुमांसं पुत्रं विन्दस्वेति मन्त्रवर्णनात् फलस्तपनाङ्गकं सीमन्तोन्नयनात्, मातृपितृजं मातृपितृद्वारा जातम्। गर्भस्थस्याश्रयसंस्कारद्वारा। उपघातः पापसङ्घः, पञ्चगुणः पञ्चप्रकारः, उपापतकः जातिभ्रंशकरण-संङ्करीकरण- मलिनीकरणा-पात्रीकरणरूपपापपञ्चकं संक्रामतीति जयस्वामी। ततश्च शोणितगर्भान्तर्गते रेतसि मातृपितृद्वारा पञ्चप्रकारं पापं संक्रामतीति तन्निवृत्तये सीमन्तोन्नयनमर्थवत् इति यावत्। अष्टौ व्रतचर्या। उपनयनादिमेखलेत्यादि ऊर्ध्वमेता इत्यन्ता वक्ष्यमाणा, अन्तर्व्रतानि आदेशविमोकवन्ति वेदभागग्रहणार्थानि सावित्रगौदा-निकव्रतिक आदित्यव्रत औपनिषद् ज्यैष्ठमासिकमहानाम्निक-भौति-कानि।स्वच्छन्दो वेदयुक्त इति।

यद्भवतु तत्र संस्काराणां संख्याविषये मतभिन्नता परिलक्ष्यते। केषाञ्चित् मतानुसारेण षोडशसंस्काराः अपरेषां तु पञ्चविंशतिः, अन्ये केचन चत्वारिंशत् अष्टचत्वारिंशत् वा संस्काराणि प्रतिपादितानि। तथापि तत्तद् गृह्यसूत्रानुसारेण तथा तथा कर्माणि अनुष्ठेयानि इति संस्कारसारकारस्याशयः। यथा प्राप्यते तत्र [5]आश्वालयन वचनानुसारेण-

**अतः परं द्विजातीनां संस्कृतिर्नियतोच्यते।**
**संस्काररहिता ये तु तेषां जन्म निरर्थकम्।**
**स्वे स्वे गृह्ये यथा प्रोक्तास्तथा संस्कृतयोऽखिलाः।**
**कर्त्तव्या भूतिकामेन नान्यथा सिद्धिमृच्छति। इति।**

एवं रूपेण तत्र सामान्येन संस्काराणां संख्या स्वरूपादिविषये उभयग्रन्थदृष्ट्या आलोच्य अधुना प्राग्जन्मसंस्काराणां विषये उभयो ग्रन्थदृष्ट्या आलोच्यते।

तत्रादौ **गर्भाधानम् –**

संस्कारेषु गर्भाधानसंस्कारस्य प्राथम्यं स्वीकृतं संस्कारसारकारः। परन्तु संस्कारतत्त्वकारस्तु विवाहादनन्तरं गर्भाधानसंस्कारविषये उपस्थापितम् स्वीयग्रन्थे। यद्भवतु तत्र येन कर्मणा गर्भस्याधानं क्रियते तत् भवति गर्भाधानम्। तत्तु ऋतुकाले एव करणीयम्। प्राप्यते यत् [6]संस्कारसारे वृहस्पतिवचनानुसारेण-

**गर्भाधानमृतौ कुर्यात्।**

प्रसङ्गेऽस्मिन् गोभिलवचनानुसारेण [7]संस्कारतत्त्वे-

**यदा ऋतुमती भवति उपरतशोणिता तदा सम्भवकालः।**

तत्र स्त्रीणां शोणितदर्शनोपलक्षितः गर्भग्रहणसमर्थः शरीरावरण-विशेषो भवति ऋतुः। अतः ऋतु प्रजाजननयोग्यकालः तन्निमित्तेन नैमित्तिकं गमनं कार्यम्। स च ऋतुकालः रजोदर्शनमारभ्य षोडशनिशापरिमितकालः। तस्मिन् ऋतौ आद्या चतस्रः रात्रयः, चतुर्दशी-अष्टमी-आमावस्या-पूर्णिमादयः पर्वाणि, संक्रान्तिः, ज्येष्ठा-मूल-मघा-आश्लेषा-रेवती-कृत्तिका-अश्विनी-उत्तराषाढा-उत्तरभाद्रपद-उत्तरफाल्गुन्यादयः नक्षत्राणि वर्ज्यानि। एता रात्रयः वर्जयित्वा अन्यासु युग्मासु पुत्रार्थी अयुग्मासु कन्यार्थी स्त्रीसंगमनं कुर्यात्। प्राप्यते यत् उभयत्र [8]याज्ञवल्क्यवचनानुसारेण-

**षोडशर्त्तुः निशा स्त्रीणां तस्मिन् युग्मासु संविशेत्।**
**ब्रह्मचार्येव पर्वाद्याश्चतस्रश्च विवर्जयेद्॥**
**एवं गच्छन् स्त्रियं क्षामां मघामूलं च वर्जयेत्।**
**सुस्थ इन्दौ सकृत्पुण्यं लक्षण्यं जनयेत् सुतम्।**
**यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्। इति।**

तत्र आपस्तम्बवचनानुसारेण रात्रयस्तु उत्तरोत्तरा प्रशस्ताः। प्रसङ्गेऽस्मिन् प्राप्यते व्यासवचनानुसारेण [9]संस्कारसारे-

**रात्रौ चतुर्थ्यां पुत्रः स्यात् अल्पायुर्धनवर्जितः।**
**पञ्चम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः।**
**सप्तम्यामप्रजा जाया अष्टम्यामीश्वरः सुतः।**
**नवम्यां शुभगाः दाराः दशम्यां प्रवरः पुमान्।**
**एकादश्यामधन्या स्त्री द्वादश्यां पुरुषो भवेत्।**
**त्रयोदश्यां सुता तस्य वर्णसंकरकारिणी।**
**धर्मध्वजः कृतज्ञः स्यात् आत्मवेदी दृढव्रतः।**
**प्रश्रयः सर्वभूतानां षोडश्यां जायते पुमान्। इति।**

तत्र गर्भाधानात् पूर्वं गर्भस्य संस्कारः अपि करणीयम्। तदपि सकृदेव न तु प्रति गर्भम्। प्राप्यते यत् [10]देवलवचनानुसारेण-

**सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता।**

तत्र गर्भसंस्कारविषये [11]संस्कारतत्त्वे गोभिलवचनानुसारेण प्राप्यते यत्-

**दक्षिणेन पाणिना उपस्थमभिस्पृशेत्।**
**विष्णुर्योनिं कल्पयत्वेतयर्च्चा**
**गर्भं धेहि सिनीच समाप्यर्च्चो सम्भवतः। इति।**

संस्कारस्यास्य अनुष्ठानक्रमविषये [12]संस्कारसारे उपलभ्यते यत्-ततः प्रागुक्तसकलानुकूल्ययुक्ते चतुर्थ्यादौ षष्ठ्यादौ वा समदिवसे प्रातःकाले-स्वस्तिवाचन-पूर्वकमाभ्युदयिकं कुर्यात्। ततः सह

ब्राह्मणैरुपनिषदम् अपराह्णपर्यन्तमधीत्य ब्राह्मणैः सह भुक्त्वा पुण्याहवाचनं कुर्यात्। सायन्तनं नित्यकर्म कृत्वा-

**विष्णुर्योनि कल्पयतु, त्वष्टा रूपाणि पिशन्तु,**
**आसिचतु प्रजापतिर्धाता गर्भं दधातु ते।**
**गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति।**
**गर्भन्तेऽश्विनौ देवावाधत्तां पुष्करस्रजौ।**

इति ऋग्द्वयं जपित्वा नानाविधधूपधूपिते नानप्रकारदीपदीपिते विततविचित्र-वितानयुक्ते हृदयानन्दजनके मत्कुणमशकादिदंशरहिते मन्दिरे मृदुतरास्तरणसुख-स्पर्शनशयने घृषितघनसराद्यनेकपूर्णफला-दिना कुङ्कुमादीनाऽपि मलयचर्चितशरीरां सुरभितकुसुममात्राघने काले स्वयमपि तथाविधस्तथाविधचन्दनानुलेपितशरीरां सुरभित-कुसुममात्राघने काले स्वयमपि तथाविधस्तथाविधचन्दना-लेपितशरीरः तथा नामावलोक्य दृष्टिपाते हौमिति प्रसादबीजं जपित्वा पूर्वोक्तरीत्या देशकालादिस्मृत्वा पितृणाम् ऋणापाका-रणहेतुकं चिरञ्जीवपुरुषगुणपुत्रसम्पादकं गर्भाधानाख्यं कर्म करिष्ये इति संकल्प्य सुगन्धामूलं वृषभमूत्रेणाम्ररसेन वा सम्यग् पेषयित्वा वस्त्राञ्चले निधाय कांस्यपात्रे निक्षिप्य कपिलक्षीरेण मिश्रयित्वा-उदीष्यतिः पतिवतीत्यस्य सूर्यासावित्रीत्रिष्टुप् अनेन शोभने मुहूर्त्ते पत्न्या दक्षिणनासारन्ध्रे सिक्त्वा तस्मिन् रसे तदुदरं गते सति तां पूषन् छिवतमामेरयस्वेति मन्त्रं जपित्वा तां सलीलां पत्नीं सकृत् गच्छेत्। तस्यां रात्रावेकवारमेव गच्छेदिति।

एवं रूपेण तत्र गर्भाधानसंस्कारविषये उभयोः ग्रन्थकारयोः अभिमतयोः प्रायः समानता परिलक्ष्यते।

**पुंसवनम्**

पुमान् सूयतेति पुंसवनम्। गर्भमासस्य तृतीये चतुर्थे मासि वा पुंसवनाख्य संस्कारः करणीयम्। यथा लभ्यते गोभिलवचनानुसा-रेण[13]संस्कारतत्वे-

**तृतीयस्य गर्भमासस्यादिमदेशे पुंसवनस्य कालः।**

[14]संस्कारसारेऽपि आपस्तम्बीयकारिकानुसारेण-

**तृतीये वा चतुर्थे वा मासि पुंसवनं भवेत्।**

तथैव [15]याज्ञवल्क्यवचनानुसारेण गर्भचलनात् प्रागेव पुंसवनाख्यं संस्कारः करणीयः। तच्च कर्म संस्कारतत्त्वानुसारेण गर्भस्य तृतीयमासस्य आद्य दशदिवसाभ्यन्तरे ज्योतिषशास्त्रविहितकाले करणीयम्। प्रसङ्गेऽस्मिन् संस्कारसारे शुभाशुभराशयः विषये प्राप्यते यत्- वनिता कन्या जीवे शुक्रे वा स्थिते नेष्टा। कर्कटमिथुने सौम्यग्रहयुतेऽपीष्टा। तथैव तत्र [16]कालदीपकवचनानुसारेण प्राप्यते यत्-

**पुंसवने वनिता न स दृष्टा कर्कियमेतर राशय इष्टा इति।**

अर्थात् कन्या, कर्कटकः, मकरः, कुम्भः, कन्या दृष्टा राशयः अतिरिच्य सर्वाः राशयः पुंसवने शुभाः। नक्षत्रेष्वपि हस्तः, मूलं, श्रवणः, पुनर्वसुः, मृगशिरा तथा पुष्यः पुंसवने शुभाः। प्राप्यते यत् [17]संस्कारसारे रत्नकोशवचनानुसारेण-

**हस्तो मूलं श्रवणपुनर्वसुमृगशिरास्तथा पुष्यः।**
**पुंसंज्ञितेषु कार्येष्वेतानि शुभानि धिष्ण्यानि। इति।**

पुनः [18]वासरेषु शुक्र-सोम-बुध-गुरुस्तु पुंसवने शुभाः।

तिथिषु चतुर्थी, नवमी, चतुर्दशी तथा सर्वाः भद्रा तिथयः वर्ज्याः। तदवत् जन्मनक्षत्र-राशि-वासर-तिथिश्चापि वर्ज्याः पुंसवने। तत्र पुंसवनाख्य कर्म रात्रौ न करणीयम्। लग्नेषु कर्कटकं, कन्यां, मिथुनं च वर्ज्याः अन्येषु नवसु लग्नेषु पुंसवनाख्य कर्म कर्तुं शक्यते। एवंरूपेण तत्र पुंसवनाख्य संस्कारे ग्राह्याग्राह्य राशि-नक्षत्र-वासर-तिथि-लग्नादिषु विषये संस्कारसारकारेण ज्योतिषशास्त्रदृष्ट्या प्रतिपाद्यते।

तदनन्तरं उभयग्रन्थाभ्यां [19]गोभिल, [20]आश्वालयनादि गृह्यसूत्रानु-सारेण पुंसवनाख्य कर्मस्य स्वरूपम् उपलभ्यते। तत्र पुंसवनकर्मस्य यत् स्वरूपं उल्लिखितं तत् प्रायः समानमेव। परन्तु कर्मस्यास्य विधाने किञ्चित् भिन्नता परिलक्ष्यते, तत्तु गृह्यसूत्रयोः भेदकारणात्। अतः उभयत्र उद्देश्यन्तु समानमेव गर्भे आगतस्य शिशोः पुंसत्वमिति।

**सीमन्तोन्नयनम्**

पुंसवनानन्तरं सीमन्तः केशरचना विशेषः कर्मः करणीयः। प्रसङ्गेऽस्मिन् [21]संस्कारसारे प्राप्यते यत्-

**यस्मिन् कर्मणि सीमन्तः केशेषु पृथगाकृतिः।**
**उन्नीयते तदुक्तं हि सीमन्तोन्नयनं बुधैः।**
**तथा शल्पादर्भेण उदुम्बरयवाङ्कुरै।**
**विभिद्य तस्याः केशेषु मध्ये सीमन्तमुन्नयेत्। इति।**

तच्च सीमन्तोन्नयनाख्यं कर्म प्रथमगर्भस्य चतुर्थे षष्ठेऽष्टमे वा [22]मासि करणीयः। यथा प्राप्यते आपस्तम्बवचनानुसारेण [23]संस्कारसारे-

**सीमन्तोन्नयनं प्रथमगर्भे चतुर्थे मासि।**

[24]याज्ञवल्क्येनापि-

**षष्ठेऽष्टमे वा सीमन्तः मास्यन्ते जातकर्म च।**

[25]बृहस्पतिनापि-

**सीमन्तः षष्ठेऽष्टमे मासीति।**

तथैव [26]ज्योतिःशास्त्रे-

**सीमन्तोन्नयनं कुर्यात् मासि षष्ठेऽष्टमेऽपि वा।**

तत्र संस्कारविषयेऽस्मिन् निबन्धकारास्तु- न निर्णयं कृतवन्तः प्रत्युत भ्रान्तिमेवोत्पादयन्ति। आपस्तम्बः – प्रथमगर्भ इत्याहु अन्ये तु प्रतिगर्भमिति। संस्कारोऽयं सकृदेवानुष्ठेयं प्रतिगर्भं वा इति शङ्कायाः निराकरणं [27]संस्कारसारकारेण स्वीयग्रन्थे स्पष्टतया कृतं तद्यथा- उभयानुग्रहस्य न्याय्यत्वादुभयपक्षनिष्ठवन्नप्रामाण्या-विशे-षाच्च गर्भक्षेत्रयोरयं संस्कारः। स च प्रथमगर्भ एवावश्यमनुष्ठेयः। शक्तश्चेत् प्रतिगर्भमनुतिष्ठेत्। अनुतिष्ठतां जातनामकर्मसीमन्त इति। तदुक्तमाश्वलायनपरिशिष्टे-गार्भपात्रसंस्कार इति श्रुतेः। गर्भपात्र-योरयं गार्भपात्रः। गार्भस्योदरगतस्य तद् आधारस्य क्षेत्रस्य स्त्रिया इत्यर्थः। अस्मादेवान्तर्गर्भमाधेहीति सत्यपि गर्भलिङ्गे तस्याः प्राधान्यान्न प्रतिगर्भमावृत्तिः।

**गृहप्रवेशं सीमन्तं स्त्रीप्रधानञ्च कारयेत्।** इति वचनात्।

तत्र द्वितीयादिगर्भे अष्टचत्वारिंशत्संस्काराणां न्यूनता, आधान-संस्कारद्वारा तेषामपि अयं संस्कार इति। ततश्चैते संरक्षणसामर्थ्ये

सति प्रतिगर्भमनुष्ठेयाः जातादीन्यप्यनुष्ठेयानि स्युः। यदा तु विनैव सीमन्तं प्रसवस्तदा पुनरनुष्ठेयताम्। तदुक्तं [28]कालप्रदीपे-

**स्त्रियामकृतसीमायां प्रसवे तु कथञ्चन।**
**गृहीतपुत्रा विधिवत्पुनः संस्कारमर्हति। इति।**

ततः सीमन्तोन्नयनाख्य कर्मस्य शुभाशुभः तिथिनक्षत्रादि प्रसङ्गे [29]संस्कारतत्त्वकारेण बृहद्राजमार्तण्डवचनानुसारेण प्रतिपाद्यते यत्-

**या नार्य्यकृतसीमन्ता प्रसूते च कथञ्चन।**
**अङ्के निधाय तं वालं पुनः संस्कारमर्हति।**
**षष्ठे मासेऽष्टमेह्नीज्यकुजदिनकृतां नन्दे सभद्रे तिथौ**
**मैत्रे मूले मृगाङ्के करपितृपवने पौष्णविष्णुत्रियुग्मे।**
**पुष्यादित्यरौद्रे युवतिहरिझषे वृश्चिके वापि लग्ने**
**चन्द्रे तारानुकूले शुभमपि नियतं स्याच्च सीमन्तकर्म।**
**मृगाजरहिते लग्ने नवांशे पुंग्रहस्य च।**
**केचिद्वदन्ति सीमन्तं तथा रिक्तेतरे तिथौ। इति।**

प्रसङ्गेऽस्मिन् [30]संस्कारसारकारेण पुंसवनवद् हस्तमूलश्रवण-पुनर्वसुमृगशिरः पुष्यप्रभृतीनि पुंनक्षत्राणि शुभानि इति कथ्यन्ते। तथैव तिथिविषये तेन [31]गुरुवचनमुत्थाप्य प्रतिपाद्यते यत्-

**चतुर्दशी चतुर्थीं च कदाचित्तु शुभप्रदे।**
**पञ्चदश्याश्च सीमन्तं चन्द्रेति शुभकर्मणि।**
**नक्तश्च विष्टिः कुलिकौ च नेष्टौ रिक्ताष्टमी पर्वकुजार्किवाराः।**
**वर्ज्यश्च जन्मत्रित्रयं तथान्यत् सीमन्तकर्मण्यशुभं च नेष्टम्। इति।**

[32]कालदीपेऽपि-

**सीमन्तोन्नयने शस्तो राशिः सिंहालिवर्जितः।**
**सप्तमादौ चतुर्थे च पौर्णमासी चतुर्दशी। इति।**

अतः तिथिषु चतुर्दशी तथा चतुर्थी कदाचित् शुभः, पूर्णिमा सदा शुभः, पुनश्च रिक्तासंज्ञकतिथयः पर्वाः च वर्ज्याः, अन्यानि तिथयः च ग्राह्याणि। वासरेषु कुजवासरः, शनिवासरः वर्ज्याः। तथैव जन्मत्रित्रयं अर्थात् जन्मनक्षत्रः, जन्मदिवसः, जन्मतिथिः च वर्ज्याः। तदवत् रात्रिकालः अपि वर्ज्यः। पुनः विष्टिः कुलिकौ च सीमन्तोन्नयने वर्ज्यौ। तत्र द्वादशराशिषु सिंहवृश्चिकौ वर्ज्यौ अन्ये च शुभग्रहयुक्ताः चेत् शुभाः।

एवंरूपेण तत्र उभयग्रन्थकाराभ्याम् सीमन्तोन्नयनाख्यकर्मस्य शुभाशुभतिथिनक्षत्रादि विषये कथयित्वा कर्मस्यास्य प्रयोगविषये च कथ्यते। तत्र उभयत्र [33]गृह्यसूत्रानुसारेण कर्मस्यास्य प्रयोगादिकं प्रतिपाद्यते। तत्र प्रायशः मतभिन्नता नैव परिलक्ष्यते। केवलं गृह्यसूत्रयोः भिन्नत्वात् प्रयोगभिन्नता परिलक्ष्यते। परन्तु उभयत्र उद्देश्यन्तु समानमेव गर्भस्थ शिशोः हितसाधनम्।

**निष्कर्षः–** संस्कारेषु प्राग्जन्मसंस्काराः मानवजीवने अतिमहत्त्वपूर्ण-स्थानम् अधिक्रियते। एतेषां संस्काराणां मूलभुत उद्देश्यन्तु गर्भे आगतः शिशोः सर्वविध हितसाधनम्। तदर्थम् अत्र ग्रन्थकाराभ्याम् संस्कारस्यास्य कालविषये विविध ज्योतिषादिशास्त्रवचनानि समुत्थाप्य सम्यकतया प्रतिपादितानि। तथैव गृह्यसूत्रवचनानि समुत्थाप्य संस्काराणां अनुष्ठानप्रयोगक्रम-विषयेऽपि उल्लिखितानि। तत्सर्वम् अत्र मया संक्षेपेण उपस्थापितम्। इत्यलम्।

**सन्दर्भसूची**

1. सं.सा.पृ.- 56
2. तत्रैव- 56
3. तत्रैव- 57
4. तत्रैव- 58
5. तत्रैव- 59
6. तत्रैव- 61
7. तत्रैव- 318
8. सं.सा.पृ.- 61, सं.त.पृ.- 318
9. सं.सा.पृ.- 61-62
10. सं.त.पृ.- 318
11. तत्रैव- 318
12. सं.सा.पृ.- 65-66
13. सं.त.पृ.- 319
14. सं.सा.पृ.- 67
15. गर्भाधानम् ऋतौ पुंसवनं स्पन्दनात्पुरा। सं.सा.पृ.- 67
16. सं.सा.पृ.- 67
17. तत्रैव- 67
18. तत्रैव- 68
19. सं.त.पृ.- 319
20. सं.सा.पृ.- 68-69
21. तत्रैव- 72
22. गोभिलः – अथ सीमन्तकरणं प्रथमे गर्भे चतुर्थे मासि षष्ठेऽष्टमे वा। सं.त.पृ.- 320
    तथैव सं.सा.पृ.- 72
23. सं.सा.पृ.- 72
24. तत्रैव- 72
25. तत्रैव- 72
26. तत्रैव- 72
27. तत्रैव- 73
28. तत्रैव- 73
29. तत्रैव- 320
30. तत्रैव- 73
31. तत्रैव- 73
32. सं.त.पृ.- 74
33. सं.सा.पृ.- 74-75, सं.त.पृ.- 320

**सन्दर्भग्रन्थसूची-**


- संस्कारसारः, श्रीनृसिंहप्रसादः,
- अष्टाविंशतितत्त्वम् (संस्कारतत्त्वम्), स्मार्त्तप्रवर श्रीरघुनन्दनः,